सुपिङ्गला, स्त्री, ( सुष्ठु पिङ्गला । ) जीवन्ती । ज्योतिष्मती । इति राजनिर्घण्टः ॥

सुपीडनं, क्ली, ( सु+पीड+ल्युट् । ) सुष्ठु मर्द्दनम् इति केचित् ॥ गाचापा इति भाषा ॥

सुपीतं, क्ली, (सु+पा+क्तः ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

सुपीवा, [न्] त्रि, (सुष्ठु पिबतीति । सु+पा+ "आतो मनिन्क्वनिप्वनिपश्च ।" ३ । २ । ७४ । इति क्वनिप् ।) शोभनपानकर्त्ता । इति मुग्धबोधटीकायां दुर्गादासः ॥

सुपुटः, पुं, (सुष्ठु पुटमस्य ।) कोलकन्दः । विष्णुकन्दः । इति राजनिर्घण्टः ॥

सुपुत्त्रिका, स्त्री, (शोभना पुत्त्रिकेव ।) जतुका । इति राजनिर्घण्टः ॥

सुपुष्करा, स्त्री, स्थलपद्मिनी । इति राजनिर्घण्टः ॥

सुपुष्पं, स्त्री, (शोभनं पुष्पमस्य ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ आहुल्यम् । प्रपौण्डरीकम् । तूलम् । इति राजनिर्घण्टः ॥ स्त्रीणां रजः । यथा,—

"सुपुष्पै राकीर्णं कुसुमधनुषो मान्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव
मनुम् ।"
इति तन्त्रसारः ॥

सुपुष्पः, पुं, (शोभनानि पुष्पाणि यस्य । ) रक्तपुष्पकः । इति शब्दचन्द्रिका ॥ पालितामादार इति भाषा ॥ शिरीषः । हरिद्रुः । राजतरुणी । इति राजनिर्घण्टः ॥

सुपुष्पिका, स्त्री, ( शोभनानि पुष्पाणि यस्याः । ङीष् । ततः कन् । ) पाटला । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्याः पाटलाशब्दे ज्ञातव्याः ॥ )

सुपुष्पी, स्त्री, (सुष्ठु पुष्पं यस्याः । ङीष् ।) श्वेतापराजिता । जोणफल्गी । शतपुष्पी । मिश्रेया । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ कदली । इति शब्दचन्द्रिका ॥

सुपूरः, पुं, बीजपूरः । इति राजनिर्घण्टः ॥

सुपूरकः, पुं, (सुष्ठु पूरयतीति । पूर+ण्वुल् ।) वकपुष्पवृक्षः । इति रत्नमाला ॥

सुप्, क्ली, लिङ्गोत्तरप्रयुज्यमानप्रत्ययविशेषः । स तु सप्तमीविभक्तेर्बहुवचनम् । इति मुग्धबोधव्याकरणम् ॥ सुपद्मादिव्याकरणमते एकविंशतिविभक्तीनां संज्ञा ॥ ( यथा, "सुप्तिङन्तचयो वाक्यम् ।" इति व्याकरणटीकायां वाक्यलक्षणम् ॥

सुप्तं, क्ली, (स्वप्+क्तः । ) सुषुप्तिः । तत्पर्य्यायः । साधिका २ । इति हेमचन्द्रः ॥

सुप्तः, त्रि, (स्वप्+क्तः ।) निद्रितः । तत्पर्य्यायः । निद्राणः २ शयितः ३ । इति हेमचन्द्रः ॥ तस्य बोधने विधिनिषेधौ यथा,—

"क्षुधितस्तृषितः कामी विद्यार्थी कृषिकारकः ।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥
मक्षिका भ्रमरी सर्पो राजा वै बालकस्तथा ।
परश्वापि च मूर्खश्च सप्त सुप्तान्न बोधयेत् ॥"

( स्वकार्य्याक्षमः । यथा,—

"त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च तुद्यते
आतन्यते सरागा च पर्व्वरुक्त्वग्गतेऽनिले ॥"
इति माधवकरसंगृहीतरुग्विनिश्चये वातव्याध्यधिकारे । ६ ॥ )

सुप्तघातकः, त्रि, ( सुप्तमपि हन्तीति । हन+ण्वुल् ।) हिंस्रः । तत्पर्य्यायः । दशेरः २ । इति त्रिकाण्डशेषः ॥

सुप्तजनः, पुं, ( सुप्ता जना यत्र । ) अर्द्धरात्रः । इति जटाधरः ॥ (सुप्तो जनः ।) निद्रितलोकश्च ॥

सुप्तज्ञानं, क्ली, ( सुप्ते निद्रावस्थायां ज्ञानम् । ) स्वप्नः । इति जटाधरः ॥

सुप्तविज्ञानं, क्ली, ( सुप्ते निद्रावस्थायां विज्ञानम् । ) स्वप्नः । इति जटाधरः ॥

सुप्तिः, स्त्री, ( स्वप्+क्तिन् । स्पर्शता । निद्रा । ( यथा, भागवते । ४ । २९ । ७१ ।

"सुप्तिमूर्च्छोपतापेषु प्राणायनविघाततः ।
नेहतेऽहमिति ज्ञानं मृत्युप्रज्वारयोरपि ॥")
विश्रम्भः । शयनम् । इति मेदिनी ॥

सुप्रतिभा, स्त्री, (सुष्ठु प्रतिभा यस्याः ।) मदिरा । इति राजनिर्घण्टः ॥

सुप्रतिष्ठा, स्त्री, (सुष्ठु प्रतिष्ठा यस्याः ।) पञ्चाक्षरावृत्तिच्छन्दः । स तु द्विविधः । पङ्क्तिः । प्रिया च यथा,—

"उक्थात्युक्था तथा मध्या प्रतिष्ठा सा
सुपूर्व्विका ।
गायत्री च ततश्चोष्णिगनुष्टुप् बृहती तथा ॥"
पङ्क्तेरुदाहरणं तच्छब्दे द्रष्टव्यम् । प्रियाया यथा । स-ल-गैः प्रिया ।

"व्रजसुभ्रुवो विलसत्कलाः ।
अभवन् प्रिया सुरवैरिणः ॥"
इति छन्दोमञ्जरी ॥

( शोभना प्रतिष्ठा । ) सुन्दरप्रशंसा च । ( शोभनप्रतिष्ठाविशिष्टे, त्रि । यथा, महाभारते । ३ । ६४ । ६४ ।

"सुभ्रूः सुकेशी सुश्रोणी सुकुचा सुद्विजानना ।
वर्च्चस्विनी सुप्रतिष्ठा स्वसितायतलोचना ।
सा विवेशाश्रमपदं वीरसेनसुतप्रिया ॥")

सुप्रतिष्ठितः, पुं, (सुष्ठु प्रतिष्ठितः ।) उडुम्बरवृक्षः । इति राजनिर्घण्टः ॥ सुन्दरप्रतिष्ठायुक्ते, त्रि ॥ ( यथा, महाभारते । २ । ५८ । ४ ।

"अयं सहस्रसमितो वैयाघ्रः सुप्रतिष्ठितः ॥"
तथाच ।
"अश्माचि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥"
इत्युद्भटः ॥ )

सुप्रतीकः, पुं, (शोभनाः प्रतीका अङ्गानि यस्य । ईशानदिग्गजः । इत्यमरः । १ । ३ । ४ ॥ ( यथा, रघुः । ५ । ७५ ।

"मदपटुनिनदद्भिर्बोधितो राजहंसैः
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥")
शिवः । कामदेवः । इति केचित् ॥ ( साधुः । इति श्रीधरस्वामी ॥ यथा, भागवते । १० । ८ । ३१ ।

"एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ
स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥"
शोभनः प्रतीकः ।) शोभनाङ्गम् । तद्युक्ते, त्रि ॥ (यथा, भागवते । ५ । ३ । २ ।

"भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदय इति ॥")

सुप्रभः, पुं, (सुष्ठु प्रभा यस्य ।) शुक्लबलः । इति हेमचन्द्रः ॥ सुन्दरप्रभायुक्ते, त्रि ॥ ( यथा, मार्कण्डेये । ९० । २७ ।

"ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवा-
करः ॥")

सुप्रभा, स्त्री, (सुष्ठु प्रभा यस्याः ।) वाकुची । इति राजनिर्घण्टः ॥ अग्निजिह्वाविशेषः । यथा,—

"सुप्रभा पद्मरागाभा वारुण्यां दिशि संस्थिता ॥"
इति तन्त्रसारः ॥

शोभनदीप्तिश्च ॥

सुप्रभातं, क्ली, ( सुष्ठु प्रभातम् । ) शुभसूचकप्रातःकालः । (यथा, भ्रमराष्टके । ८ ।

"रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पद्मजालम् ।
इत्थं विचिन्तयति कोषगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥")
प्राभातिकपाठ्यमङ्गलवाक्यम् । यथा,—

सुकेशिरुवाच ।

"किं तदुक्तं सुप्रभातं शङ्करेण महात्मना ।
प्रभाते यत् पठन्मर्त्यो मुच्यते पापबन्धनात् ॥

ऋषय ऊचुः ।

श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ।
श्रुत्वा स्मृत्वा पठित्वा च सर्व्वपापैः प्रमुच्यते ॥

ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुः सशुक्रः सह भानुजेन
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
भृगुर्व्वशिष्ठः क्रतुरङ्गिराश्च
मनुः पुलस्त्यः पुलहः सगोतमः ।
रैभ्यो मरीचिश्च्यवनोऽमलोरुः
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गली च ।
सप्तस्वराः सप्तरसातलाश्च
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथापः
सस्पर्शवायुर्ज्वलितश्च तेजः ।
नभः सशब्दं महता सहैव
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
सप्तार्णवाः सप्त कुलाचलाश्च
सप्तर्षयो द्वीपवराश्च सप्त ।
भूरादि कृत्वा भुवनानि सप्त
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥